(A)

| | |
|---|---|
| [1]आमयिता-त्री, | आमिमयिषिता-त्री ; |
| [B]आमयन्-न्ती, | आमिमयिषन्-न्ती ; |
| आमयिष्यन्-न्ती-ती, | आमिमयिषिष्यन्-न्ती-ती ; |
| आमयमानः, | आमिमयिषमाणः ; |
| आमयिष्यमाणः, | आमिमयिषिष्यमाणः ; |
| [2]आन्-आमौ-आमः ; | — |
| आमितम्-तः-तवान्, | आमिमयिषितम्-तः-तवान्, |
| आमः, आमयः,[3] | आमिमयिषुः ; |
| आमयितव्यम्, | आमिमयिषितव्यम् ; |
| आमनीयम्, | आमिमयिषणीयम् ; |
| आम्यम्, | आमिमयिष्यम् ; |
| ईषदामः, दुरामः, स्वामः ; | |
| आम्यमानः, | आमिमयिष्यमाणः ; |
| आमः, | आमिमयिषः, |
| आमयितुम्, | आमिमयिषितुम् ; |
| आमना, | आमिमयिषा ; |
| आमनम्, | आमिमयिषणम् ; |
| आमयित्वा, | आमिमयिषित्वा ; |
| समाम्य, | समामिमयिष्य ; |
| आमम् २, } | आमिमयिषम् २ ; } |
| आमयित्वा २, } | आमिमयिषित्वा २ ; } |

---

1. अमन्तत्वेन मित्त्वं तु न । 'नान्ये मितोऽहेतौ' (ग. सू. चुरादौ) इति निषेधात् । स्वार्थे णिचि परतः ज्ञपादिपञ्चकव्यतिरिक्ताः मितो न भवन्तीति तदर्थः ।

2. 'मो नो धातोः' (8-2-64) इति नत्वम् । न चात्र स्थानिवद्भावः–'पूर्वत्रासिद्धे—' (वा. 1-1-58) इति तन्निषेधात् ।

3. औणादिकः अयच् । रोगः ।

A अस्य धातोश्चुरादिपाठात् शुद्धधातोरेव रूपाणि । अजादित्वात् यङ् न ।

B 'द्रागामयन् विचटदस्थिकयाऽथ मुष्ट्या प्रास्फोटयत् तमजितोऽपि स घाटिताङ्गम् । दिष्ट्यैष हिंसयति देव्यममुं युधीति संमोदमर्जयति घोषति नाकिलोके ॥' धा. का. 3–39.